२रासक्रीडायाञ्च तल्लक्षणं यथा "पृथु सुवृत्तं मसृणं वितस्तिमात्रोन्नतं कौ विनिखन्य शङ्कुकम्। आक्रम्य पद्भ्यामितरेतरन्तु हस्तैर्भ्रमोऽयं खलु रासगोष्ठी" हरिवं०टी०नीलकण्ठः। [२होमे ४आह्वाने च अमरः।

**हव** पु० हु-अप् ह्वे-अप् संप्र० पृषो० वा। १यज्ञे २आज्ञायां

**हवन** न० हु-भावे ल्युट्। होमे देवाद्युद्देशेन मन्त्रपूर्वकं वह्नौ हविःप्रक्षेपे शब्दच०। [त्रिका०

**हवनी** स्त्री हूयतेऽस्यां हु-आधारे ल्युट् ङीप्। यज्ञकुण्डे

**हवनीय** त्रि० हु-कर्मणि अनीयर्। होमीयद्रव्ये।

**हवा** अव्य० ह च वा च द्वन्द्व०। प्रसिद्धार्थे।

**हविरशन** पु० हविरश्नाति अश-युच्। १वह्नौ हेमच०। २चित्रकवृक्षे च। भावे ल्युट्। ३हुतभोजने न०। [राजनि०।

**हविर्गन्धा** स्त्री हविषो गन्धो यस्याम्। शम्यां (शाइ)

**हविर्गेह** न० हविषो गेहम्। यज्ञमण्डपपश्चिमदक्षिणस्थे हवनीयद्रव्यस्थापनार्थे गेहभेदे हेमच०। [क्षारीवृक्षे रत्नमा०।

**हविर्मन्थ** पु० हविषे मथ्यतेऽसौ मन्थ-कर्मणि घञ्। गणि-

**हविष्य** न० हविषे हितम् यत्। १घृते हेमच०। स्मृत्युक्ते हैमन्तिकादावन्ने च "चेरुर्हविष्यं भुञ्जानाः" भाग० १०। "नारिकेलफलञ्चैव कदलीं लवलीं तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्। व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः" ति० त० अगस्त्यसंहिता।

**हविष्यान्न** न० कर्म०। "हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका। षष्टिका कालशाकञ्च मूलकं केमुकेतरत्। लवणे सिन्धुसामुद्रे गव्ये च दधिसर्पिषी। पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। तिन्तिडी जीरकञ्चैव नागरङ्गञ्च पिप्पली। कदली लवली धात्री फलान्यगुडमैक्षवम्। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते" इत्युक्ते व्रतादौ भक्ष्यद्रव्यभेदे।

**हविस्** न० हूयते हु-कर्मणि असुन्। १घृते अमरः २हवनीयद्रव्यमात्रे च "वपाया मेदसो हविषोऽनुब्रूहीति" श्रुतिः। "मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्। अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते" स्मा० त० उक्ते ३द्रव्यभेदे। भावे असुन्। ४होमे।

**हव्य** न० हु-कर्मणि यत्। १देवयोग्यान्ने अमरः। २हवनीयद्रव्ये त्रि०। भावे यत्। ३होमे न०।

**हव्यपाक** पु० हव्याय होमाय पाको यत्र। होमार्थं दुग्धघृतादिमिश्रिते सिद्धे अन्ने चरौ अमरः।

**हव्यवाह** पु० हव्यं वहति देवान् वह-अण्। १अग्नौ रत्नमा० २चित्रकवृक्षे च। [अमरः। २चित्रकवृक्षे च।

**व्यहवाहन** पु० हव्यं वाहयति वह-णिच्-ल्यु। १वह्नौ

**हव्याश** पु० हव्यमश्नाति अश-अण्। १वह्नौ शब्दर० २चित्रकवृक्षे। ल्यु। हव्याशनोऽप्युभयत्र पु० हेमच०।

**हस** हासे भ्वा० प० अक० सेट् एदित्। णिचि न वृद्धिः। हसति अहसीत्। दोषदर्शनपूर्वकहासे तु सकर्मकः "स्मितावहस्येव पुरं मघोनः" इति भट्टिः। [अमरः।

**ह(हा)स** पु० हस-अप् घञ् वा। हास्ये मुखविकाशनभेदे

**हसन** न० हस-भावे ल्युट्। प्रीत्या मुखकपोलादेर्विकाशने हास्ये

**हसन्ती** स्त्री हस-झ ङीप्। अङ्गारधानिकायां अमरः। २मल्लिकाभेदे ३शाकिनीभेदे च मेदि०। हस-मतुप्-ङीप्। हसत् ४हासिनि त्रि० स्त्रियाम् ङीप्।

**हसित** न० हस-भावे क्त। १हास्ये कर्त्तरि क्त। २कृतहास्ये ३विकसिते च त्रि०। हास्यशब्दे दृश्यम्।

**हस्त** पु० हस-तन् न इट्। १देहावयवभेदे (हात) अमरः। २चतुर्विंशत्यङ्गुलपरिमाणे "यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः" लीला०। ३हस्तिशुण्डे च। ४अश्विन्यादिषु त्रयोदशे नक्षत्रे पुं स्त्री० मेदि० अस्त्रेना-शब्दे पु० दृश्यम्। "जाह्नवी हस्तयोगे" इति पुराणम्। "पुष्या हस्ता तथा स्वातिः" ज्यो०। केशवाचकात् परः। ५समूहे। केशहस्तः।
"हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च। दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम्। तस्मादन्तरितं कृत्वा पर्णेनाथ तृणेन वा। प्रदद्यात् न तु हस्तेन नायसेन कदाचन" स्मा० त०। [हस्ते राजनि०।

**हस्तजोड़ि** पु० हस्तं जुड़ति जुड़ इन्। (हातजोड़ा)

**हस्तपुच्छ** न० ६त०। हस्तावयवभेदे (हातेर पोँछा)। त्रिका०

**हस्तवारण** न० ६त०। मारणोद्यतस्य निवारणे अमरः।

**हस्तबिम्ब** न० हस्तस्य बिम्बं यत्र। व्यासके चन्दनादिना देहविलेपनविशेषे हेमच०। [श्रीधरः।

**हस्तसिद्धि** स्त्री हस्तस्य तत्कर्मणः सिद्धिर्यतः। वेतने

**हस्तसूत्र** न० हस्तस्य सूत्रमिव। वलये हेमच०।

**हस्तामलक** न० हस्तस्थितमामलकम् आमलक्याः फलं तदिव वा। १करावस्थितामलकफले तद्वत् २अनायासलभ्ये पदार्थे च। करामलकादयोऽप्यत्र। ३वेदान्तप्रतिपादकग्रन्थभेदे च।

**हस्तिक** न० हस्तिनां समूहः कन्। हस्तिसमूहे शब्दर०।